[redacted] YASHWANT CLASSES Estd.1995 Subject: [redacted]

# संस्कृतम् (कोड् सङ्ख्या-122)

**समयः – 3 होराः** **पूर्णाङ्काः - 80**

**सामान्यनिर्देशाः –**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे **11** पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे **18** प्रश्नाः सन्ति।
3. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

| | | | |
|---|---|---|---|
| 'क' खण्डः | : | अपठितावबोधनम् | 10 अङ्काः |
| 'ख' खण्डः | : | रचनात्मककार्यम् | 15 अङ्काः |
| 'ग' खण्डः | : | अनुप्रयुक्तव्याकरणम् | 25 अङ्काः |
| 'घ' खण्डः | : | पठितावबोधनम् | 30 अङ्काः |

4. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः
6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

## 'क' खण्डः

## अपठितावबोधनम् (10 अङ्काः)

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –** **10**

पूर्वजानां संस्मरणम् अस्मान् अद्भुतं विशिष्टं महत्त्वभूतं समाजोपयोगिनं परोपकारयुक्तं च कार्यं कर्तुं प्रोत्साहयति। अस्मभ्यम् अद्भुतकार्यकरणाय प्रेरणां प्रदाय समुचितं पन्थानम् अनुसर्तुं गन्तुं च साहाय्यं करोति। ये पुरुषाः स्वजीवने विशिष्टं महत्कार्यम् अकुर्वन् ते एव भविष्यति काले जनैः संस्मर्यन्ते। तेषां जीवनघटनाः अन्येभ्यः शिक्षाप्रदाः दिक्प्रदर्शकाश्च भवन्ति। भारतभूमिः कर्मभूमिः त्यागभूमिः इति च स्वदेशीयैः विदेशीयैश्च ग्रन्थेषु बहुधा वर्णितं भवति। इयं सनातनभूमिः धन्या यस्याः भारतभूम्याः प्रतिपदं श्रेष्ठनरनारीणां जीवनगाथाभिः प्रतिध्वन्यते। भारतीये इतिहासे केचन तपसा ज्ञानेन ग्रन्थग्रथनेन प्रसिद्धिमापन्नाः सञ्जाताः। एते ऋषयः, मुनयः, दार्शनिकाः कवयः इत्यादिनामभिः प्रख्याताः। अन्ये केचन शौर्येण त्यागेन देशप्रेम्णा वा आचन्द्रसूर्यं कीर्तिम् आर्जयन्। ब्रह्मतेजसा केचन भूमिम् इमाम् अभूषयन्। अपरे च केचन वीराः क्षात्रेण ओजसा च भारतभूमेः धर्मं संस्कृतिं जनताञ्च समरक्षयन्। अतः एतादृशानां पूर्वजानां संस्मरणं अस्माभिः कर्तव्यमेव। तैः उक्तः मार्गः कृतं च कार्यम् अवश्यम् अनुसर्तव्यम्।

**अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** **1x2=2**

(i) केषां जीवनघटनाः अन्येभ्यः शिक्षाप्रदाः भवन्ति?

(ii) केन केचन भूमिम् इमाम् अभूषयन्?

(iii) पूर्वजानां संस्मरणं कैः कर्तव्यमेव?

**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** **2x2=4**

(i) भारतभूम्याः प्रतिपदं काभिः प्रतिध्वन्यते?

(ii) पूर्वजानां संस्मरणम् अस्मान् कीदृशं कार्यं कर्तुं प्रोत्साहयति?

(iii) भारतभूमेः धर्मं संस्कृतिं जनताञ्च के समरक्षयन्?

**इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** **1**

**ई. यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)** **1x3=3**

**(i)** 'ते एव भविष्यति काले जनैः संस्मर्यन्ते।' अत्र किं क्रियापदम्**?**

(क) भविष्यति (ख) काले

(ग) संस्मर्यन्ते (घ) जनैः

**(ii)** 'उक्तः' इति विशेषणपदस्य विशेष्यपदं किम्?

(क) मार्गः (ख) तैः

(ग) कवयः (घ) कवयः

**(iii)** 'धराम्' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?

| | | |
|---|---|---|
| | (क) धन्या (ख) भूमिम्<br>(ग) इमाम् (घ) ओजसा<br>**(iv)** 'अज्ञानेन' इति पदस्य विपर्ययपदं किं प्रयुक्तम्?<br>(क) शौर्येण (ख) क्षात्रेण<br>(ग) प्रेम्णा (घ) ज्ञानेन | |
| | | |
| | **'ख' खण्डः**<br>**रचनात्मकं कार्यम् (15 अङ्काः)** | |
| **2.** | **भवान् अक्षतः। भवतः संस्कृतपठने रुचिः। भवान् कानिचन पुस्तकानि क्रेतुम् इच्छति। अतः प्रकाशकाय अधोलिखितं पत्रं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत –**<br>मथुरातः<br>दिनाङ्कः .............<br>(i) .......................<br>प्रकाशन-प्रबन्धक-महोदयाः!<br>रा.शै.अनु.प्र.परिषद्, नई दिल्ली<br>विषयः – पुस्तकक्रयणस्य (ii) .............. ।<br>मान्यवर!<br>सविनयं (iii) ............ अस्ति यत् मम संस्कृत-संस्कृति-आधारितानां (iv) ............... पठने अधिका रुचिः वर्तते। मम (v) .................. भवतां प्रकाशितानां पुस्तकानां केचन सङ्घाः (vi) ........... । भवद्भिः संस्कृत-परीक्षा दृष्ट्या कानिचन व्याकरण-पुस्तकानि, बालमनोविनोदनाय कथापुस्तकानि च प्रकाशितानि सन्ति। (vii)..................... पुस्तकेषु अहं कानिचन पुस्तकानि वाञ्छामि। तेषां सूची अधः (viii) ................ अस्ति।<br>कृपया (ix) .............. पत्रालयमाध्यमेन सम्प्रेष्य माम् अनुगृह्णन्तु भवन्तः।<br>पुस्तकसूची - अभ्यासवान् भव, व्याकरणवीथिः, बालकथावली, व्याकरणसौरभम्।<br>विनीतः<br>(x) ..............<br>**मञ्जूषा**<br>पुस्तकानि, सन्ति, निवेदनम्, सेवायाम्, तेषु, सन्दर्भे, पुस्तकानाम्, समीपे, संलग्ना, अक्षतः। | **½x10=5** |
| **3.** | **प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत –** | **1x5=5** |



**मञ्जूषा**

| |
|---|
| विपण्याः, हस्ते, जनाः, स्यूतः, कण्डोलः, आपणिकः, मापनम्,<br>महिला, शिरसि, जनसम्मर्दः, क्रीणाति, शाकानि, फलानि, भ्रमन्ति। |

**अथवा**

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत -** **1×5=5**

**"मर्यादापुरुषोत्तमः श्रीरामः"**

**मञ्जूषा**

| |
|---|
| अयोध्यायाम्, सर्वदा, पालयति, धर्मज्ञः, सत्यप्रियः, आसीत्, जानाः,<br>तस्य, जपम्, अभवत्, नाम्नः, नियमान्, ऋषयः, मुनयः, जन्म। |

**4.** **अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत – (केवलं वाक्यपञ्चकम्)** **1×5=5**

1. माता पिता देवता के समान होते हैं।

   Parents are like Gods.
2. आत्मसम्मान ही सबसे बड़ी सम्पत्ति है।

   Self-respect is the greatest asset.
3. मेरे पिता जी सुबह कार्यालय जाते हैं।

   My father goes to office in the morning.
4. कल मेरे सभी मित्र मेरे घर आये थे।

| | | |
|---|---|---|
| | Yesterday all my friends came to my house.<br>5. कल हम सब खेलने जायेंगें।<br>Tomorrow we will all go to play.<br>6. सभी का आदर होना चाहिए।<br>Everyone should be respected.<br>7. हम सब श्लोक गाते हैं।<br>We all sing shlokas. | |
| | | |
| | **'ग' खण्डः**<br>**अनुप्रयुक्तव्याकरणम् (25 अङ्काः)** | |
| | | |
| **5.** | **अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत- (केवलं प्रश्नचतुष्टयम्)**<br>(i) त्वया महत्कौतुकम् आवेदितम् **यन्मानुषात्** अपि बिभेषि।<br>(ii) अस्ति **देउलाख्यः + ग्रामः**।<br>(iii) **मूर्खाश्च** मूर्खैः सङ्गमनुव्रजन्ति।<br>(iv) विनिपातो न वः **कश्चित् + दृश्यते**।<br>(v) **तोयैः + अल्पैः** अपि करुणया भीमभानौ निदाघे। | **1×4=4** |
| | | |
| **6.** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत – (केवलं प्रश्नचतुष्टयम्)**<br>(i) खगकुल-**कलरवैः गुञ्जितं** वनदेशम्।<br>(क) कलरवैर्गुञ्जितम् (ख) कलरवैगुञ्जितम्<br>(ग) कलरवगुञ्जितम् (घ) कलरवैरगुञ्जितम्<br>(ii) **काकचेष्टः** विद्यार्थी एव आदर्शच्छात्रः मन्यते।<br>(क) काकः इव चेष्टा यस्य सः (ख) काकस्य चेष्टा<br>(ग) काकः चेष्टः (घ) काकः चेष्टः इव<br>(iii) **वाचि पटुः** धैर्यवान् मन्त्री सभायामप्यकातरः।<br>(क) वाचिपटुः (ख) वाक्पटुः<br>(ग) वाच्पटुः (घ) वाच पटुः<br>(iv) प्रस्तरतले **लताश्च तरवश्च गुल्माश्च** नो भवन्तु पिष्टाः।<br>(क) लतातरुगुल्मा (ख) लताः तरुः गुल्मा<br>(ग) लतातरुगुल्म (घ) लतातरुगुल्माः | **1×4=4** |

| | | |
|---|---|---|
| | (v) **सव्यङ्ग्यम्** अरे अहिभुक्! नृत्यातिरिक्तं का तव विशेषता?<br>(क) व्यङ्ग्ये सहितम् (ख) व्यङ्ग्येन सहितम्<br>(ग) व्यङ्ग्यात् सहितम् (घ) व्यङ्ग्याय सहितम् | |
| | | |
| **7.** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्)**<br>(i) सा निजबुद्ध्या व्याघ्रस्य भयात् **विमुक्ता**।<br>(क) विमुक्त + तल् (ख) विमुक्त + ङीप्<br>(ग) विमुक्त + टाप् (घ) विमुक्त + ठक्<br>(ii) **सामाजिकं** कार्यं सर्वे कुर्वन्तु।<br>(क) समाज + ठक् (ख) समाज + त्व<br>(ग) समाज + ङीप् (घ) समाज + इक्<br>(iii) त्वं मीनान् **क्रूर + तल्** भक्षयसि।<br>(क) क्रूरताम् (ख) क्रूरतया<br>(ग) क्रूरतायाम् (घ) क्रूरतायाः<br>(iv) तदेव महात्मानः **सम + त्व** इति तथ्यतः आहुः।<br>(क) समत्व (ख) समता<br>(ग) समताम् (घ) समत्वम्<br>(v) **बुद्धिमत् + ङीप्** पुत्रद्वयोपेता पितुः गृहं प्रति चलिता।<br>(क) बुद्धिमती (ख) बुद्धिमत्<br>(ग) बुद्धिमतीप् (घ) बुद्धिमतीम् | **1x4=4** |
| | | |
| **8.** | **वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत – (केवलं प्रश्नत्रयम्)**<br>(i) अयि शुभे! किम् एवं ......... रुद्यते?<br>(क) त्वम् (ख) त्वया<br>(ग) त्वाम् (घ) तव<br>(ii) भोः वासव! पुत्रस्य दैन्यं दृष्ट्वा अहं .........?<br>(क) रुद्ये (ख) रुद्यते<br>(ग) रोदिमि (घ) रोदिवः<br>(iii) सः दीन इति जानन्नपि सः कृषकः ................. पीडयति।<br>(क) तौ (ख) तेन<br>(ग) सः (घ) तम् | **1x3=3** |

| | | |
|---|---|---|
| | (iv) किम् एतत् भवता न ............?<br>(क) दृश्यते (ख) पश्यति<br>(ग) दृश्ये (घ) दृश्यसे | |
| | | |
| 9. | **कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत- (केवलं प्रश्नचतुष्टयम्)**<br>(i) ब्रह्मचारी ब्रह्ममुहूर्ते ............ 4:15 जागरणं करोति।<br>(ii) सः ............ 4:45 यौगिकक्रियां करोति।<br>(iii) पश्चात् सः स्नात्वा ............ 5:30 उपासनां करोति।<br>(iv) तदनन्तरं ............ 6:00 वेदपारायणं करोति।<br>(v) सः ............ 8:15 अल्पाहारं करोति। | **1x4=4** |
| | | |
| 10. | **मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - (केवलं प्रश्नत्रयम्)**<br>(i) ............ भवता मृणालपटली भुक्ता।<br>(ii) अस्माकं परीक्षा ........ अस्ति।<br>(iii) ............ विद्यालये कार्यक्रमः आसीत्।<br>(iv) मां विहाय कथमन्यः कः ............ राजा भवितुम् अर्हति?<br>**मञ्जूषा**<br>अद्य, ह्यः, अपि, यत्र | **1x3=3** |
| | | |
| 11. | **अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत – (केवलं प्रश्नत्रयम्)**<br>(i) **त्वं** सर्वे एव मे प्रियाः?<br>(क) युवाम् (ख) यूयम्<br>(ग) सः (घ) तौ<br>(ii) महर्षिवाल्मीकिः उपनयन-**उपदेशस्य** आवयोः गुरुः अस्ति।<br>(क) उपदेशेन (ख) उपदेशाय<br>(ग) उपदेशयोः (घ) उपदेशान्<br>(iii) सा कुपिता एवं **भणसि**।<br>(क) भणतः (ख) भणामि<br>(ग) भणति (घ) भणन्ति | **1x3=3** |

| | | |
|---|---|---|
| | (iv) <u>**भयङ्करः**</u> व्याघ्रमारी तूर्णं धाविता।<br>(क) भयङ्कराः (ख) भयङ्करम्<br>(ग) भयङ्कराम् (घ) भयङ्करा | |
| | **'घ' खण्डः**<br>**पठितावबोधनम् (30 अङ्काः)** | |
| | | |
| **12.** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>आदेशं प्राप्य उभौ प्राचलताम्। तत्रोपेत्य काष्ठपटले निहितं पटाच्छादितं देहं स्कन्धेन वहन्तौ न्यायाधिकरणं प्रति प्रस्थितौ। आरक्षी सुपुष्टदेह आसीत्, अभियुक्तश्च अतीव कृशकायः। भारवतः शवस्य स्कन्धेन वहनं तत्कृते दुष्करम् आसीत्। स भारवेदनया क्रन्दति स्म। तस्य क्रन्दनं निशम्य मुदित आरक्षी तमुवाच 'रे दुष्ट! तस्मिन् दिने त्वयाऽहं चोरिताया मञ्जूषाया ग्रहणाद् वारितः। इदानीं निजकृत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे" इति प्रोच्य उच्चैः अहसत्। यथाकथञ्चित् उभौ शवमानीय एकस्मिन् चत्वरे स्थापितवन्तौ। | **5** |
| | **अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क) अभियुक्तः कया क्रन्दति स्म?<br>(ख) अभियुक्तः कीदृशः आसीत्?<br>(ग) कीदृशं देहं वहन्तौ तौ प्रस्थितौ? | **½x2=1** |
| | **आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)**<br>(क) मुदितः आरक्षी अभियुक्तं किम् उवाच?<br>(ख) उभौ शवं कुत्र स्थापितवन्तौ?<br>(ग) कीदृशस्य शवस्य वहनं दुष्करम् आसीत्? | **1x2=2** |
| | **इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्)**<br>(क) 'दुःखी' इत्यस्य किं विपर्ययपदम् अत्र प्रयुक्तम्?<br>(ख) 'मृतशरीरस्य' इत्यस्य पर्यायपदं गद्यांशात् चित्वा लिखत।<br>(ग) 'प्राचलताम्' क्रियापदस्य कर्तृपदं लिखत। | **1x2=2** |
| | | |
| **13.** | **अधोलिखितं पद्यं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>**अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।**<br>**तदेवाहुः महात्मानः समत्वमिति तथ्यतः॥**<br>**त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।**<br>**परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः॥** | **5** |

S

| | | |
|---|---|---|
| | **अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क) चित्ते वाचि च का भवेत्?<br>(ख) कः परुषां वाचं वदति?<br>(ग) तदेव समत्वम् इति के आहुः?<br>**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क) कः अपक्वं फलं भुङ्क्ते?<br>(ख) समत्वं किं भवति?<br>(ग) वाचि कीदृशी अवक्रता भवेत्?<br>**इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्)**<br>(क) 'आहुः' इति क्रियापदस्य कर्तृपदं किम्?<br>(ख) 'वक्रता' इति पदस्य विलोमपदं श्लोकात् चित्वा लिखत।<br>(ग) 'मनसि' इति पदस्य पर्यायपदं श्लोकात् चित्वा लिखत। | ½x2=1<br><br><br><br>1x2=2<br><br><br><br>1x2=2 |
| 14. | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>(सिंहासनस्थः रामः। ततः प्रविशतः विदूषकेनोपदिश्यमानमार्गौ तापसौ कुशलवौ)<br>**विदूषकः** - इत इत आर्यौ!<br>**कुशलवौ** - (रामम् उपसृत्य प्रणम्य च) अपि कुशलं महाराजस्य?<br>**रामः** - युष्मद्दर्शनात् कुशलमिव। भवतोः किं वयमत्र कुशलप्रश्नस्य भाजनम् एव, न पुनरतिथिजनसमुचितस्य कण्ठाश्लेषस्य। (परिष्वज्य) अहो हृदयग्राही स्पर्शः। (आसनार्धमुपवेशयति)<br>**उभौ** - राजासनं खल्वेतत्, न युक्तमध्यासितुम्।<br>**रामः** - सव्यवधानं न चारित्रलोपाय। तस्मादङ्क-व्यवहितमध्यास्यतां सिंहासनम्। (अङ्कमुपवेशयति)<br>**उभौ** - (अनिच्छां नाटयतः) राजन्! अलमतिदाक्षिण्येन।<br>**रामः** - अलमतिशालीनतया।<br>भवति शिशुजनो वयोऽनुरोधाद् गुणमहतामपि लालनीय एव।<br>व्रजति हिमकरोऽपि बालभावात् पशुपति-मस्तक-केतकच्छदत्वम्॥<br>**रामः** - एष भवतोः सौन्दर्यावलोकजनितेन कौतूहलेन पृच्छामि-क्षत्रियकुल-पितामहयोः सूर्यचन्द्रयोः को वा भवतोर्वंशस्य कर्ता?<br>**लवः** - भगवन् सहस्रदीधितिः।<br>**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क) कुशलवयोः मार्गं कः निर्दिशति? | 5<br><br><br><br><br><br><br><br><br><br><br><br><br><br><br><br>½x2=1 |
| | (ख) कौ अनिच्छां नाटयतः? | |

| | | |
|---|---|---|
| | (ग) कुशलवयोः वंशस्य कर्ता कः? | |
| | **आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** | 1x2=2 |
| | (क) रामः कथं वंशपरिचयं पृच्छति?<br>(ख) कुशलवौ रामम् उपसृत्य प्रणम्य च किं पृच्छतः?<br>(ग) हिमकरः कस्मात् भावात् पशुपतेः मस्तके व्रजति? | |
| | **इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्)** | 1x2=2 |
| | (क) 'निर्गच्छतः' इति पदस्य विपर्ययपदं नाट्यांशात् चित्वा लिखत।<br>(ख) 'ततः प्रविशतः विदूषकेनोपदिश्यमानमार्गौ तापसौ कुशलवौ।' अत्र कर्तृपदं किम्?<br>(ग) 'समीपं गत्वा' इत्यस्य पर्यायपदं किं प्रयुक्तम्? | |
| | | |
| 15. | **रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नचतुष्टयम्)**<br>(क) हिमकरः **<u>बालभावात्</u>** पशुपतेः मस्तके व्रजति।<br>(ख) गजः **<u>वन्यपशून्</u>** तुदन्तं शुण्डेन पोथयित्वा मारयति।<br>(ग) चौरस्य **<u>पादध्वनिना</u>** अतिथिः प्रबुद्धः।<br>(घ) आरक्षी चौर्याभियोगे तं **<u>न्यायालयं</u>** नीतवान्।<br>(ङ) दुर्वहमत्र जीवितं जातं **<u>प्रकृतिः</u>** एव शरणम्। | 1x4=4 |
| | | |
| 16. | **मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत –**<br>**तोयैरल्पैरपि करुणया भीमभानौ निदाघे**<br>**मालाकार ! व्यरचि भवता या तरोरस्य पुष्टिः।**<br>**सा किं शक्या जनयितुमिह प्रावृषेण्येन वारां**<br>**धारासारानपि विकिरता विश्वतो वारिदेन॥**<br>**अन्वयः –** हे मालाकार! (i) ............ निदाघे अल्पैः तोयैः अपि (ii) ......... करुणया अस्य तरोः या पुष्टिः व्यरचि। वाराम् (iii) ............ विश्वतः धारासारान् अपि विकिरता वारिदेन इह (iv) ......... सा (पुष्टिः) किम् शक्या।<br>**मञ्जूषा**<br>भवता, भीमभानौ, जनयितुम्, प्रावृषेण्येन।<br>**अथवा** | 1x4=4 |
| | **मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**<br>**सम्पत्तौ च विपत्तौ च महतामेकरूपता।**<br>**उदये सविता रक्तो रक्तश्चास्तमये तथा॥**<br>**भावार्थः-** अस्य श्लोकस्य भावः अस्ति यत् यथा (i)............ उदये समये रक्तः भवति, सः सूर्यः (ii) .................. समये अपि रक्तः भवति, तथैव महान्तः सज्जनाः सम्पत्तौ | 1x4=4 |

| | | |
|---|---|---|
| | (iii) ...................... सति अपि शान्ताः भवन्ति एवमेव विपत्तौ आगते अपि ते<br>(iv) ............ तिष्ठन्ति विचलिताः न भवन्ति।<br>**मञ्जूषा**<br>अस्ते, सूर्यः, शान्ताः, आगते। | |
| | | |
| **17.** | **अधोलिखित-कथांशं समुचित-क्रमेण लिखत –**<br>(क) व्याघ्रोऽपि सहसा नष्टः गलबद्धशृगालकः।<br>(ख) जम्बुककृतोत्साहाद् व्याघ्रात् कथं मुच्यताम्?<br>(ग) परं प्रत्युत्पन्नमतिः सा जम्बुकमाक्षिपन्त्यङ्गुल्या तर्जयन्त्युवाच।<br>(घ) शृगालेन सहितं पुनरायान्तं व्याघ्रं दूरात् दृष्ट्वा बुद्धिमती चिन्तितवती।<br>(ङ) अतएव उच्यते-बुद्धिर्बलवती तन्वि सर्वकार्येषु सर्वदा।<br>(च) यदि एवं तर्हि मां निजगले बद्ध्वा चल सत्वरम्।<br>(छ) सः व्याघ्रः तथा कृत्वा काननं ययौ।<br>(ज) एवं प्रकारेण बुद्धिमती व्याघ्रजाद् भयात् पुनरपि मुक्ताऽभवत्। | **½x8=4** |
| | | |
| **18.** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत- (केवलं प्रश्नत्रयम्)**<br>(i) विद्वांसः लोकेस्मिन् **चक्षुष्मन्तः** प्रकीर्तिताः।<br>(क) नेत्रवन्तः (ख) धनवन्तः<br>(ग) ज्ञानवन्तः (घ) विद्यावन्तः<br>(ii) सा पुत्रौ चपेटया प्रहृत्य **जगाद**।<br>(क) गदति (ख) अरोदित्<br>(ग) उक्तवती (घ) अहसत्<br>(iii) वायुमण्डलं <u>**भृशं**</u> दुषितम्।<br>(क) दूरम् (ख) अत्यधिकम्<br>(ग) न्यूनम् (घ) किञ्चित्<br>(iv) पाषाणी सभ्यता <u>**निसर्गे**</u> समाविष्टा न स्यात्।<br>(क) निस्सरणम् (ख) धरायाम्<br>(ग) स्वर्गे (घ) प्रकृत्याम् | **1x3=3** |

-------------0000--------------

**समयः होरात्रयम्** **अङ्कयोजना उत्तरसङ्केताश्च** **सम्पूर्णाङ्काः 80**

**अवधातव्यम् -**

1. अङ्कयोजनायां प्रदत्तानि उत्तराणि निदर्शात्मकानि सन्ति। प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति।
2. **आन्तरिकविकल्पात्मकेषु प्रश्नेषु यद्यपि स्पष्टतया निर्देशः दत्तः अस्ति यत् केवलं प्रश्नद्वयम् अथवा प्रश्नत्रयम् इत्यादिकम् उत्तरं दातव्यं तथापि यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय निर्णयः कर्त्तव्यः।** यथा चित्रवर्णने पञ्चवाक्यानां लेखनम् अभीष्टं परं छात्रः यदि सप्तवाक्यानि लिखति तर्हि तत्र केवलं प्रथम-पञ्चवाक्यानां न अपितु यानि वाक्यानि उत्तमानि सन्ति तेषां मूल्याङ्कनं करणीयम्। **(अयं नियमः नवम्यां कक्षायां अपि परिपालनीयः।)**
3. अनुच्छेदे श्लोके नाट्यांशे वा पृष्टाः प्रश्नाः अवबोधात्मकाः सन्ति। अतः विद्यार्थिनः एतेषु प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाचि-शब्दानां प्रयोगं कर्तुं शक्नुवन्ति। तदर्थम् अङ्काः देयाः। यदि विद्यार्थिनः उत्तरलेखन-समये समुचितानां विभक्तीनां वचनानां च प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः।
6. रचनात्मक-कार्ये वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्त्वम्। अतः आंशिकवाक्यशुद्धये अपि अङ्काः देयाः।

| | खण्डः 'क' अपठितावबोधनम् | |
|---|---|---|
| 1 | **गद्यांशः** | |
| | **अ एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** | 1×2=2 |
| | (i) पूर्वजानाम् | |
| | (ii) ब्रह्मतेजसा | |
| | (iii) अस्माभिः | |
| | **आ पूर्णवाक्येन लिखत - (केवलं प्रश्नद्वयम्)** | 2×2=4 |
| | (i) भारतभूम्याः प्रतिपदं श्रेष्ठनरनारीणां जीवनगाथाभिः प्रतिध्वन्यते। | |

| | | |
|---|---|---|
| | (ii) पूर्वजानां संस्मरणम् अस्मान् अद्भुतं विशिष्टं महत्त्वभूतं समाजोपयोगिनं परोपकारयुक्तं च कार्यं कर्तुं प्रोत्साहयति।<br>(iii) अपरे च केचन वीराः क्षात्रेण ओजसा च भारतभूमेः धर्मं संस्कृतिं जनताञ्च समरक्षयन्।<br>इ **अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत –**<br>**पूर्वजाः/ पूर्वसंस्मरणानि**<br>छात्रस्य उत्तरं दृष्ट्वा छात्रहिताय समुचितः निर्णयः करणीयः।<br>ई **यथानिर्देशम् उत्तरत (केवलं प्रश्नत्रयम्)**<br>(i) (ग) संसर्यन्ते<br>(ii) (क) मार्गः<br>(iii) (ख) भूमिम्<br>(iv) (घ) ज्ञानेन | **1**<br><br><br>1×3=3 |
| | **खण्डः 'ख' रचनात्मकं कार्यम्** | |
| **2.** | **पत्रलेखनम्**<br>मथुरातः<br>दिनाङ्कः -----------<br>(i) **सेवायाम्**<br>प्रकाशन-प्रबन्धक-महोदयाः!<br>रा.शै.अनु.प्र.परिषद्, नई दिल्ली<br><br>विषयः – पुस्तकक्रयणस्य (ii) **सन्दर्भे** ।<br><br>मान्यवर!<br>सविनयं (iii)**निवेदनम्** अस्ति यत् मम संस्कृत-संस्कृति-आधारितानां (iv) **पुस्तकानां** पठने अधिका रुचिः वर्तते। मम (v) **समीपे** भवतां प्रकाशितानां पुस्तकानां केचन सङ्ग्राः (vi) **सन्ति**। भवद्भिः संस्कृत-परीक्षा दृष्ट्या कानिचन व्याकरण-पुस्तकानि, बालमनोविनोदनाय कथापुस्तकानि च प्रकाशितानि सन्ति। (vii) **तेषु** पुस्तकेषु अहं कानिचन पुस्तकानि वाञ्छामि। तेषां सूची अधः (viii) **संलग्ना** अस्ति।<br>कृपया (ix) **पुस्तकानि** पत्रालयमाध्यमेन सम्प्रेष्य माम् अनुगृह्णन्तु भवन्तः।<br>पुस्तकसूची - अभ्यासवान् भव, व्याकरणवीथी, बालकथावली, व्याकरणसौरभम्।<br><br>विनीतः<br>(x) **अक्षतः** | **½x10=5** |

| | | |
|---|---|---|
| 3. | **चित्रवर्णनम्**<br>अत्र छात्रेभ्यः संक्षिप्तवाक्यरचना अपेक्षिता वर्तते। केवलं वाक्यशुद्धिः द्रष्टव्या। **अस्य प्रश्नस्य प्रमुखम् उद्देश्यं वाक्यरचना अस्ति।** वाक्यं दीर्घम् अस्ति अथवा लघु इति महत्त्वपूर्णं नास्ति। प्रतिवाक्यम् अर्धः अङ्कः भावस्य कृते अर्धः अङ्कः च व्याकरणदृष्ट्या शुद्धतानिमित्तं निर्धारितः अस्ति। मञ्जूषायां प्रदत्ताः शब्दाः सहायतार्थं सन्ति। छात्रः तेषां वाक्येषु प्रयोगं कुर्यादेव इति अनिवार्यं नास्ति। छात्रः स्वमेधया अपि वाक्यानि निर्मातुं शक्नोति। मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्यते।<br>**अथवा**<br>**अनुच्छेदलेखनम्**<br>अयं विकल्पः सर्वेभ्यः अस्ति। छात्राः मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्नुवन्ति। अतः अङ्काः देयाः। अस्य मूल्याङ्कनाय अन्ये नियमाः चित्रवर्णनस्य अनुगुणं पालनीयाः। | 1x5=5 |
| | | |
| 4. | **अनुवादः (केवलं वाक्यपञ्चकम्)**<br>(i) मातापितरौ देवतातुल्यौ भवतः।<br>(ii) आत्मसम्माननम् एव बृहत्तमा सम्पत्तिः अस्ति।<br>(iii) मम पिता प्रातःकाले कार्यालयं गच्छति।<br>(iv) ह्यः मम सर्वाणि मित्राणि मम गृहम् आगच्छन्।<br>(v) श्वः वयं सर्वे खेलनाय/क्रीडनाय/ खेलितुं/क्रीडितुं गमिष्यामः।<br>(vi) सर्वेषाम् आदरः भवेत्।<br>(vii) वयं श्लोकं गायामः। | 1x5=5 |
| | | |
| | **खण्डः 'ग' अनुप्रयुक्तव्याकरणम्** | |
| 5 | **सन्धिः सन्धिच्छेदश्च (केवलं प्रश्नचतुष्टयम्)**<br>(i) यत्+मानुषात्<br>(ii) देउलाख्यो ग्रामः<br>(iii) मूर्खाः + च<br>(iv) कश्चिद् दृश्यते<br>(v) तोयैरल्पैः | 1x4=4 |

| | | |
|---|---|---|
| 6 | समासः विग्रहः च (केवलं प्रश्नचतुष्टयम्)<br>(i) (ग) कलरवगुञ्जितम्<br>(ii) (क) काकः इव चेष्टा यस्य सः<br>(iii) (ख) वाक्पटुः<br>(iv) (घ) लतातरुगुल्माः<br>(v) (ख) व्यङ्ग्येन सहितम् | 1x4=4 |
| | | |
| 7 | प्रत्ययाः (केवलं प्रश्नचतुष्टयम्)<br>(i) (ग) विमुक्त + टाप्<br>(ii) (क) समाज + ठक्<br>(iii) (ख) क्रूरतया<br>(iv) (घ) समत्वम्<br>(v) (क) बुद्धिमती | 1x4=4 |
| | | |
| 8 | वाच्यम् (केवलं प्रश्नत्रयम्)<br>(i) (ख) त्वया<br>(ii) (ग) रोदिमि<br>(iii) (घ) तम्<br>(iv) (क) दृश्यते | 1x3=3 |
| | | |
| 9 | समयः (केवलं प्रश्नचतुष्टयम्)<br>(i) सपादचतुर्वादने<br>(ii) पादोनपञ्चवादने<br>(iii) सार्धपञ्चवादने<br>(iv) षड्वादने<br>(v) सपादाष्टवादने | 1x4=4 |
| | | |
| 10 | अव्ययपदानि (केवलं प्रश्नत्रयम्)<br>(i) यत्र<br>(ii) अद्य<br>(iii) ह्यः<br>(iv) अपि | 1x3=3 |

| | | |
|---|---|---|
| 11 | **अशुद्धसंशोधनम् (केवलं प्रश्नत्रयम्)**<br>(i) (ख) यूयम्<br>(ii) (क) उपदेशेन<br>(iii) (ग) भणति<br>(iv) (घ) भयङ्करा | 1x3=3 |
| | | |
| | **खण्डः 'घ' पठितावबोधनम्** | |
| 12. | **गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>**अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) भारवेदनया<br>(ख) कृशकायः<br>(ग) काष्ठपटले निहितम्/पटाच्छादितम्<br>**आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) मुदित आरक्षी तमुवाच 'रे दुष्ट! तस्मिन् दिने त्वयाऽहं चोरिताया मञ्जूषाया ग्रहणाद् वारितः। इदानीं निजकृत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे"<br>(ख) उभौ शवमानीय एकस्मिन् चत्वरे स्थापितवन्तौ।<br>(ग) भारवतः शवस्य स्कन्धेन वहनं तत्कृते दुष्करम् आसीत्।<br>**इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) मुदितः<br>(ख) शवस्य<br>(ग) उभौ | 5<br>½x2=1<br><br><br><br>1x2=2<br><br><br><br><br>1x2=2 |
| | | |
| 13. | **पद्यांशः**<br>**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क) अवक्रता<br>(ख) विमूढधीः<br>(ग) महात्मानः<br>**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क) विमूढधीः अपक्वं फलं भुङ्क्ते।<br>(ख) यथा चित्ते तथैव यदि वाचि अवक्रता भवेत् तदेव तथ्यतः समत्वं भवति।<br>(ग) यथा चित्ते तथैव यदि वाचि अवक्रता भवेत्। | 5<br>½x2=1<br><br><br><br>1x2=2 |

| | | |
|---|---|---|
| | **इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्)**<br>(क) महात्मानः<br>(ख) अवक्रता<br>(ग) चित्ते | 1x2=2 |
| | | |
| 14. | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क) विदूषकः<br>(ख) उभौ/कुशलवौ<br>(ग) सहस्रदीधितिः<br>**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क) रामः कौतूहलेन वंशपरिचयं पृच्छति।<br>(ख) कुशलवौ रामम् उपसृत्य प्रणम्य च पृच्छतः - अपि कुशलं महाराजस्य इति।<br>(ग) हिमकरः बालभावात् पशुपतेः मस्तके व्रजति ।<br>**इ. निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क) प्रविशतः<br>(ख) कुशलवौ<br>(ग) उपसृत्य | 5<br>½x2=1<br><br><br><br>1x2=2<br><br><br><br>1x2=2 |
| 15 | **प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नचतुष्टयम्)**<br>(क) हिमकरः **कस्मात्** पशुपतेः मस्तके व्रजति?<br>(ख) गजः **कान्** तुदन्तं शुण्डेन पोथयित्वा मारयति?<br>(ग) चौरस्य **केन** अतिथिः प्रबुध्दः?<br>(घ) आरक्षी चौर्याभियोगे तं **कुत्र/कम्** नीतवान्?<br>(घ) दुर्वहमत्र जीवितं जातं **का** एव शरणम्? | 1x4=4 |
| 16 | **अन्वयः-**<br>**अन्वयः** – हे मालाकार! (i) **भीमभानौ** निदाघे अल्पैः तोयैः अपि (ii) **भवता** करुणया अस्य तरोः या पुष्टिः व्यरचि। वाराम् (iii) **प्रावृषेण्येन** विश्वतः धारासारान् अपि विकिरता वारिदेन इह (iv) **जनयितुम्** सा (पुष्टिः) किम् शक्या।<br>**अथवा**<br>**भावार्थे रिक्तस्थानपूर्तिः**<br>**भावार्थः-** अस्य श्लोकस्य भावः अस्ति यत् यथा (i) **सूर्यः** उदये समये रक्तः भवति, सः सूर्यः (ii) **अस्ते** समये अपि रक्तः भवति, तथैव महान्तः सज्जनाः जनाः सम्पत्तौ (iii) **आगते** | 1x4=4<br><br><br><br><br><br>1x4=4 |

| | | |
|---|---|---|
| | सति अपि शान्ताः भवन्ति एवमेव विपत्तौ आगते अपि ते (iv) **शान्ताः** तिष्ठन्ति विचलिताः न भवन्ति। | |
| | | |
| 17 | **कथा-क्रमानुसार-लेखनम् –**<br>(क) यदि एवं तर्हि मां निजगले बद्ध्वा चल सत्वरम्।<br>(ख) सः व्याघ्रः तथा कृत्वा काननं ययौ।<br>(ग) शृगालेन सहितं पुनरायान्तं व्याघ्रं दूरात् दृष्ट्वा बुद्धिमती चिन्तितवती ।<br>(घ) जम्बुककृतोत्साहाद् व्याघ्रात् कथं मुच्यताम्?<br>(ङ) परं प्रत्युत्पन्नमतिः सा जम्बुकमाक्षिपन्त्यङ्गुल्या तर्जयन्त्युवाच ।<br>(च) व्याघ्रोऽपि सहसा नष्टः गलबद्धशृगालकः।<br>(छ) एवं प्रकारेण बुद्धिमती व्याघ्रजाद् भयात् पुनरपि मुक्ताऽभवत् ।<br>(ज) अतएव उच्यते-बुद्धिर्बलवती तन्वि सर्वकार्येषु सर्वदा। | **½x8=4** |
| | | |
| 18 | **प्रसङ्गानुकूलम् उचितार्थम् (केवलं प्रश्नत्रयम्)**<br>(i) (क) नेत्रवन्तः<br>(ii) (ग) उक्तवती<br>(iii)(ख) अत्यधिकम्<br>(iv) (घ) प्रकृत्याम् | **1x3=3** |

-------------0000--------------